
अथ

गणपत्यथर्वशीर्षम्



CC-0 In Public Domain. Digitzed by eGangotri



CC-0 In Public Domain. Digitized by eGangotri

॥ श्रीगणेशायनमः ॥ ॐ भद्रंकर्णेभिः ॥ १ ॥ स्वस्तिनइंद्रो० ॥ १ ॥ अथ गणेशाथर्वशीर्षंव्याख्यास्यामः ॥

ॐ नमस्तेगणपतये ॥ त्वमेवप्रत्यक्षंतत्त्वमसि ॥ त्वमेवकेवलंकर्तासि ॥ त्वमेवकेवलंधर्तासि ॥ त्वमेव केवलंहर्तासि ॥ त्वमेवसर्वंखल्विदंब्रह्मासि ॥ त्वंसाक्षादात्मासिनित्यं ॥ ऋतंवच्मि ॥ सत्यंवच्मि ॥ अवत्वंमां ॥ अववक्तारं ॥ अवश्रोतारं ॥ अवदा

CC-0 In Public Domain. Digitized by eGangotri

तारं ॥ अवधातारं ॥ अवानूचानमवशिष्यं ॥
अवपश्चात्तात् ॥ अवपुरस्तात् ॥ अवोत्तरात्तात् ॥
अवदक्षिणात्तात् ॥ अवचोर्ध्वात्तात् ॥ अवाधरा-
त्तात् ॥ सर्वतोमांपाहिपाहिसमंतात् ॥ त्वंवाङ्मय-
स्त्वंचिन्मयः ॥ त्वमानंदमयस्त्वंब्रह्ममयः ॥ त्वंस-
च्चिदानंदाद्वितीयोसि ॥ त्वंप्रत्यक्षंब्रह्मासि ॥ त्वंज्ञान-
मयोविज्ञानमयोसि ॥ सर्वजगदिदंत्वत्तोजायते ॥

CC-0 In Public Domain. Digitzed by eGangotri

सर्वंजगदिदंत्वत्तस्तिष्ठति ॥ सर्वंजगदिदंत्वयिलय-
मेष्यति ॥ सर्वंजगदिदंत्वयिप्रत्येति ॥ त्वंभूमिरापो-
नलोनिलोनभः ॥ त्वंचत्वारिवाक्पदानि ॥ त्वंगुणत्र-
यातीतः ॥ त्वंदेहत्रयातीतः ॥ त्वंकालत्रयातीतः ॥
त्वंमूलाधारस्थितोसिनित्यं ॥ त्वंशक्तित्रयात्मकः ॥
त्वांयोगिनोध्यायंतिनित्यं ॥ त्वंब्रह्मात्वंविष्णुस्त्वं-
रुद्रस्त्वमिंद्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वं चंद्रमास्त्वं

CC-0 In Public Domain. Digitzed by eGangotri

ब्रह्मभूर्भुवःस्वरोम् ॥ गणादिंपूर्वमुच्चार्यवर्णादिंतद-
नंतरं ॥ अनुस्वारःपरतरः ॥ अर्धेंदुलसितं ॥
तारेणरुद्धं ॥ एतत्तवमनुस्वरूपं ॥ गकारःपूर्वरूपं ॥
अकारोमध्यमरूपं ॥ अनुस्वारश्चांत्यरूपं ॥ बिंदु-
रुत्तररूपं ॥ नादःसंधानं ॥ सꣳहितासंधिः ॥
सैषागणेशविद्या॥गणकऋषिः ॥ निचृद्गायत्रीछंदः॥
गणपतिर्देवता ॥ ॐगंगणपतयेनमः ॥ एकदंताय

CC-0 In Public Domain. Digitzed by eGangotri

विद्महेवक्रतुंडायधीमहि ॥ तन्नोदंतीप्रचोदयात् ॥
एकदंतंचतुर्हस्तंपाशमंकुशधारिणम् ॥ रदंचवरदं
हस्तैर्बिभ्राणंमूषकध्वजम् ॥ रक्तंलंबोदरंशूर्पकर्णकं
रक्तवाससं ॥ रक्तगंधानुलिप्तांगंरक्तपुष्पैःसुपूजि
तम् ॥ भक्तानुकंपिनंदेवंजगत्कारणमच्युतं ॥ आवि
र्भूतंचसृष्ट्यादौप्रकृतेःपुरुषात्परं ॥ एवंध्यायतियो
नित्यंसयोगीयोगिनांवरः ॥ नमोव्रातपतये नमो

CC-0 In Public Domain. Digitzed by eGangotri

गणपतयेनमः प्रमथपतये नमस्ते अस्तुलंबोदरायै-
कदंतायविघ्ननाशिनेशिवसुतायश्रीवरदमूर्तये नमः॥
एतदथर्वशीर्षंयोधीते॥सब्रह्मभूयायकल्पते॥ससर्वतः
सुखमेधते ॥ ससर्वविघ्नैर्नबाध्यते ॥ सपंचमहा
पापात्प्रमुच्यते ॥ सायमधीयानोदिवसकृतंपापं
नाशयति ॥ प्रातरधीयानोरात्रिकृतंपापंनाशयति ॥
सायंप्रातःप्रयुंजानोअपापोभवति ॥ सर्वत्राधीया-

CC-0 In Public Domain. Digitized by eGangotri

नोऽपविघ्नोभवति ॥ धर्मार्थकाममोक्षंचाविंदति ॥
इदमथर्वशीर्षमशिष्यायनदेयं ॥ योयदिमोहाद्दा-
स्यति ॥ सपापीयान्भवति ॥ सहस्रावर्तनात् ॥
यंयंकाममधीते ॥ तंतमनेनसाधयेत् ॥ अनेनगण
पतिमभिषिंचति ॥ सवाग्मीभवति ॥ चतुर्थ्यामन-
श्नन्जपति ॥ सविद्यावान्भवति ॥ इत्यथर्वणवाक्यं ॥
ब्रह्माद्याचरणंविद्यात ॥ नबिभेतिकदाचनेति ॥

CC-0 In Public Domain. Digitzed by eGangotri

योदूर्वांकुरैर्यजति ॥ सवैश्रवणोपमोभवति ॥ योला-
जैर्यजति ॥ सयशोवान्भवति ॥ समेधावान्भवति ॥
योमोदकसहस्रेणयजति ॥ सवांछितफलमवाप्नोति ॥
यःसाज्यसमिद्भिर्यजति ॥ ससर्वंलभतेससर्वंलभते ॥
अष्टौब्राह्मणान्सम्यग्ग्राहयित्वा ॥ सूर्यवर्चस्वीभ-
वति ॥ सूर्यग्रहेमहानद्यांप्रतिमासंनिधौवाजप्त्वा ॥
सिद्धमंत्रोभवति ॥ महाविघ्नात्प्रमुच्यते ॥ महा

CC-0. In Public Domain. Digitized by eGangotri

दोषात्प्रमुच्यते ॥ महापापात्प्रमुच्यते ॥ ससर्ववि-
द्भवतिससर्वविद्भवति ॥ यएवंवेद ॥ इत्युपनिषत् ॥
॥ १३ ॥ सहनाववतु सहनौभुनक्तु । सहवीर्यंकरवा-
वहै । तेजस्विनावधी तमस्तुमाविद्विषावहै ॥ भद्रं-
कर्णेभिः० ॥ १ ॥ स्वस्तिनइंद्रो० ॥ १ ॥

॥ इति गणपत्यथर्वशीर्षम् समाप्तम् ॥

CC-0 In Public Domain. Digitzed by eGangotri

॥ अथ संकटनाशनगणपतिस्तोत्रम् ॥

श्रीगणेशाय नमः ॥ नारद उवाच ॥ प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ॥ भक्त्या व्यासं स्मरेन्नित्यमायुःकामार्थसिद्धये ॥ १ ॥ प्रथमं वक्रतुंड च एकदंतं द्वितीयकम् ॥ तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्थकम् ॥ २ ॥ लंबोदरं पंचमं च षष्ठं विकटमेव च ॥ सप्तमं विघ्नराजेंद्र धूम्रवर्णं तथाऽ-

CC-0 In Public Domain. Digitzed by eGangotri

ष्टमम् ॥ ३ ॥ नवमं भालचंद्रं च दशमं तु विना-
यकम् ॥ एकादशं गणपतिं द्वादशं तु गजाननम् ॥
॥ ४ ॥ द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः ॥
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो ॥ ५ ॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥
पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम् ॥ ६ ॥
जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत ॥

CC-0 In Public Domain. Digitzed by eGangotri

संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ७ ॥
अष्टानां ब्राह्मणानां च लिखित्वा यः समर्पयेत् ॥
तस्य विद्या भवेत्सद्यो गणेशस्य प्रसादतः ॥ ८ ॥

इति श्रीनारदपुराणे संकटनाशनं नाम गणपतिस्तोत्रं संपूर्णम्.

समाप्त

CC-0 In Public Domain. Digitzed by eGangotri

विक्रीस तयार.

	किंमत आ.		किंमत आ.
अन्नपूर्णा स्तोत्र	१	जयलाभादि दत्त स्तोत्र ...	१
उपमन्युक्त शिवस्तोत्र ...	१	दत्तात्रय स्तोत्र	१
गणेशाष्टक स्तोत्र	१	नवग्रह स्तोत्र	१
गणपति स्तोत्र	१	नारायण स्तोत्र	१
गजेंद्रमोक्ष स्तोत्र	१	भवानी स्तोत्र	१
गोविंदाष्टक	१	लक्ष्मी स्तोत्र	१
गंगा स्तोत्र	१	शिवतांडव स्तोत्र	१
चर्पटपंजरी स्तोत्र	१	शिवमानसपूजा स्तोत्र ...	१

मुद्रक व प्रकाशक—द. वि. पाठक, जगदीश्वर प्रेस, गिरगांव, गायवाडी, मुंबई ४.
आवृत्ति ५ वी सन १९४९] [[illegible] सन १९४९.

CC-0 In Public Domain. Digitzed by eGangotri

इति

गणपत्यथर्वशीर्षम्

समाप्तम्

किंमत २ आणे

CC-0 In Public Domain. Digitzed by eGangotri